प्रातिशाख्येषु ऋक्तन्त्रम्- एकं विवेचनम्

डॉ. गिरिजाप्रसादषडङ्गी

शोधसारांशः – वैदिकव्याकरणग्रन्थेषु प्रातिशाख्यानि अत्यन्तं प्रसिद्धानि । अत्र वेदसंहितासु प्रयुक्तानां पदानां मूलस्वरूपं बोधयितुं पदपाठविषयकानि विधानानि विहितानि। एतानि प्रातिशाख्राणि प्रतिवेदं प्रतिशाखं प्रति भिद्यन्ते । ऋक्तन्त्रमिति प्रातिशाख्यं ऋग्वेदस्य प्रातिशाख्यं भवति। प्रातिशाख्यमिदं शाकटायनेन औद्रवज्रिणा लिखितमिति ज्ञायते । शोधपत्रेऽस्मिन् ऋक्ततन्त्रस्य कर्तृत्वमारभ्य ऋक्ततन्त्रोक्तानां आचार्याणां विवरणमिति विषयपर्यन्तं ऋक्तन्त्रोक्ताः नैके विषयाः समुपन्यस्ताः।

वैदिकवाङ्मये प्रातिशाख्यस्य महत्वपूर्णं स्थानं विद्यते। शाखां शाखां प्रति प्रतिशाखं, प्रतिशाखं भवं प्रातिशाख्यम् इति व्युत्पत्यनुसारं प्रातिशाख्यं नाम ग्रन्थः प्रतिशाखमधिकृत्य कृतं शास्त्रं विद्यते। वैदिकमन्त्राणां सुरक्षार्थं वैदिककाले आचार्याणां परिषत् आयोजिता भवति। तत्र संहितापाठमधिकृत्य, ध्वनिमधिकृत्य, सन्धिविषयकम् उदात्तादिस्वरपदादिविषयकञ्च शास्त्रार्थं भवति स्म। तस्यामेव परिषदि चर्चया संसिद्धविषयाणां स्वरूपमेव प्रातिशाख्यनाम्ना प्रसिद्धः।

संहितासु प्रयुक्तानां पदानां मूलस्वरूपं बोधयितुं पदपाठविषयकानि विधानानि विहितानि। संहितायां विद्यमानानां वर्णपदादीनामुच्चारणप्रक्रिया चोपदिष्टा वर्तते।

1.1.प्रातिशाख्यायां प्रतिपाद्यांशाः-

प्राचीनपरम्परानुसारेण प्रातिशाख्यं, शिक्षा, व्याकरणादि ग्रन्थेषु प्रतिपाद्यविषयः एक एव। ऋक्प्रातिशाख्ये प्रारम्भिकश्लोके उच्यते -

"शिक्षाच्छन्दोव्याकरणैः सामान्येनोक्तलक्षणम्।

तदेवमिह शाखायामिति शास्त्रप्रयोजनम्।।"[1] इति

प्रातिशाख्यस्य मुख्यप्रतिपाद्यविषयस्तावत् प्रयोगगतलघुता तथा गुरुतायाः निर्णयः, स्वरमात्रायाः वर्णनं, वर्णानां लोपागमविकारादि, स्वर, श्वास, नाद, प्रकृतिः एवं क्रमः।

उच्यते-

"गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च।

लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः।।

स्वरितोदात्तनीचत्वं श्वासो नादस्तथोभयम्।

एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयता।।[2] "

पदपाठ, क्रमपाठ इत्यादीनामध्ययनविषयोऽप्येषां विषयवस्तु भवति।

"जपक्रमविशेषज्ञो वर्णक्रमविचक्षणः।

स्वरमात्राविशेषज्ञो गच्छेदाचार्यसम्पदम्।। [3]"

पदपाठ, अवग्रह, प्रगृह्यादि लक्षणमप्येषां विषयः-

"प्रातिशाख्यनियतमेव पदावग्रहप्रगृह्याप्रगृह्यक्रमसंहिता

स्वरलक्षणमुच्यते तानीमानि प्रातिशाख्यानीत्यर्थः।।"[4]

वर्णसमाम्नायः, वर्णानां अनुप्रदानं, स्थानकरणादि, छन्दसां प्रतिपादनमस्मिन्नेव कृतम्-

"स्थानकरणानुप्रदानानि। व्याकरणं नामेयमुत्तरा विद्या।

सोऽसौ छन्दोशास्त्रेष्वभिविनीत उपलब्ध्याधिगन्तुमुत्सहते।"[5]

वर्णोच्चारणदोषादीनां निर्धारणमप्येषः ग्रन्थः करोति -

"वर्णदोषविवेकार्थम्" [6]

1.2.प्रातिशाख्यशब्दस्याशयः-

प्रातिशाख्यशब्दस्य व्याख्यानात् तथा निर्वचनाच्च ज्ञायते यत् विदुषामत्र मतैक्यं विद्यते। अस्य सम्बन्धेन विचारद्वयं लभ्यते-

1.2.1. प्रतिशाखासम्बन्धः -

अमुं मतमनुसृत्य वाजसनेयीप्रातिशाख्ये उक्तम्- शाखायां शाखायां प्रतिशाखं भवं प्रातिशाख्यम् इति। पाणिनीयसूत्रस्य भट्टोजीदीक्षितानां टीकायाः ज्ञानेन्द्र सरस्वतीकृत टीकायां "प्रतिशाखं भवं प्रातिशाख्यम्"[7] इति प्रतिपादितम् । ऋक्प्रातिशाख्यस्य उव्वटभाष्ये मङ्गलाचरणे उक्तम्-

"शिक्षाच्छन्दोव्याकरणैः सामान्येनोक्तलक्षणम्।

तदेवमिह शाखायामिति शास्त्रप्रयोजनम्।।"[8]

तत्वबोधिन्यां उक्तम्- "धर्मशास्त्राणां गृह्यग्रन्थानां च प्रातिशाख्यलक्षणवत् प्रतिचरणं पाठव्यवस्थोपलभ्यते"[9]। अनेन ज्ञायते यत् प्राचीनकाले वेदस्य प्रत्येकमपि शाखायाः सम्बद्धं उपरि वर्णित-प्रतिपाद्यविषयाणां विवेचनमनेन ग्रन्थमाध्यमेनैव क्रियते स्म।

1.2.2. शाखासमूहस्य सम्बद्धः-

अनेन मतानुसारेण प्रातिशाख्यग्रन्थस्य सम्बन्द्धः न केवलं शाखाविशेषे परं शाखासमूह इत्यर्थे उपयुज्यते। एवं च प्रातिशाख्यग्रन्थस्य सम्बन्धः न केवलं वेदस्य कस्याश्चित् शाखाया इति न,अनेकशाखायाः कृते इत्युक्तम्, तैत्तिरीयप्रातिशाख्ये "वीत्युपबन्धस्य व्यावर्त्य शाखान्तरे नन्वेवमनेकशाखाविषयत्वे प्रातिशाख्य"[10]मिति ग्रन्थस्य आख्या विरूध्यते। नैतदस्ति। द्विशाखाविषयत्वेऽपि तदसाधारणतया उपपत्तेः। तथा बह्वृचानां शाकलवाष्कलात्मकशाखाद्वयविषयं प्रातिशाख्यं प्रसिद्धम्।।

यद्येषां ग्रन्थानां प्रतिशाखासम्बन्धः कल्प्यते तर्हि प्रातिशाख्यानां संख्या शाखानुरूपेण भवेयुः। उपलब्ध प्रातिशाख्यानां संख्या विरला एव। अत एव एतेषां शाखासमूहेन सम्बन्धः इति कल्पनयैव सुकरं भवेत् ।

उपर्युक्तनिर्णयः प्रातिशाख्यग्रन्थानामनुपलब्ध्याधारेण कृतम्। परन्तु एतदेव सर्वथा नोचितं मन्ये। प्रातिशाख्यस्य सम्बन्धः वेदस्य प्रतिशाखायां आसीत् । किमर्थं चेत् अद्य वैदिकसाहित्यस्य अनुपलब्धिः एव कारणं, केवल प्राचीनग्रन्थेषु तद्विषये तत्र तत्र उल्लेखं दृश्यते ।

1. 3.सामवेदीयप्रातिशाख्यम् -

सामवेदसर्वानुक्रमणिकायां प्रातिशाख्यरूपेण सप्तदशलक्षणग्रन्थानामुल्लेखो विद्यते -

"गृह्यं गायत्र ऋक्तन्त्रं सामतन्त्रञ्च पुष्पकम्।

ततोऽवग्रहं च हितवाक्यं स्तोभानुसंहरम्।।

मात्रार्चिके छलं चैव पाणिनीयञ्च शैक्षकम्।

नारदीयं गौतमीयं लोमशीयमतः परम्।।

अग्र आयानुदात्तञ्च रावणीयं ततः परम्।

परिशिष्टे लक्षणेऽस्मिन् वनसंख्या प्रकीर्तिताः।।"[11]

सामवेदीय फुल्लपोतपुस्तकस्य भूमिकायां लक्षणग्रन्थानां परिचयः विस्तरेण प्रदत्तोऽस्ति, द्रष्टव्यः। गोभिलगृह्यसूत्रस्य व्याख्याकारः भट्टनारायणः ऋक्तन्त्रस्य सम्बन्धः राणायनीयशाखायाः इत्युक्तम्- "राणायनीयानाम् ऋक्तन्त्रप्रसिद्धा विसर्जनीयस्याभिनिष्ठानाख्या" इति।

1.4.ऋक्तन्त्रस्य परिचयः

ऋक्तन्त्रं पञ्चप्रपाठकात्मकम्। प्रथमप्रपाठके खण्डचतुष्टयम्। द्वितीयप्रपाठकादारभ्य पञ्चमप्रपाठकपर्यन्तं दशकेन विभक्ताः। द्वितीयप्रपाठके षट्दशकाः, तृतीयप्रपाठके अष्टदशकाः, चतुर्थप्रपाठके सप्तदशकाः एवञ्च पञ्चमप्रपाठके सप्तदशकाः भवन्ति। आहत्य सूत्राणां संख्या 286 विद्यते। परन्तु ग्रन्थान्ते सूत्राणां संख्या 280 अशीत्यधिकशतद्वयं सूत्राणि इति लिखितम्। अस्य ऋचां विस्तरः ऋक्तन्त्रम् एवं व्याकरणमिति अर्थं विद्यते।ऋक्ततन्त्रमधिकृत्य सामवेदसर्वानुक्रमणिका उच्यते-

"ऋचां तन्त्रं व्याकरणे पञ्चसंख्या प्रपाठकाः।
शाकटायन देवेन द्वात्रिंशत्खण्डिका स्मृताः।।"
तत्रादिमे प्रपाठके चत्वारः खण्डसम्मताः।
द्वितीये रस इत्युक्तस्तृतीये वसुसंज्ञकम्।।
चतुर्थे पञ्चमे चैव मुनिसंख्या समीरिताः।
वाचो वृत्तिश्च मासे तु तस्मादुच्चश्रुतीनि च।
आविरादि तथा कर्ण सूत्रं जालालनं स्मृतम्।।
त्रयस्त्रिंशच्च दशकं सूत्रञ्च वसुसंज्ञकम्।
ऋक्तन्त्रञ्च समाप्तं स्याद्विज्ञेयं सामवित्तमैः।। [12]

प्रथमे प्रपाठके अक्षराणामुत्पत्तिस्थानानि, उत्पत्तिप्रकारः, तेषां स्वरूपं च प्रतिपाद्यते। द्वितीये अक्षराणां स्थानं, स्वरः, मात्रानिर्णयः क्रियते। तृतीये तेषां संहिता सन्निकर्षविकाराश्चोद्यन्ते। चतुर्थे विसर्गस्य सकारः, लोपः, अन्यस्य वर्णस्य वर्णान्तरत्वम् इत्यादि विधीयते। पञ्चमे वर्णस्य दीर्घीभावः, द्वित्वं, मूर्धन्यभावः, इत्यादि।

प्रथमप्रपाठकस्य प्रथमखण्डे ध्वन्युत्पादने वायोः महत्वं प्रदर्शयन् कण्ठ्य, तालव्यादि वर्णानामुत्पत्तिर्वर्णिता। द्वितीयखण्डः अक्षरसमाम्नायेन सम्बन्धितः वर्तते। तृतीयखण्डे स्थानानां प्रयत्नानां च विवेचनं कृतम्। चतुर्थखण्डे प्रत्याहारदृष्ट्या वर्णानां संयोजनं विद्यते।

द्वितीयप्रपाठके वर्णानां उच्चारणस्थानं, वर्गविभजनं, अक्षरविभजनस्य च नियमः, मात्रा तथा तेषां विभजननियमाः एवं स्वराणां विवेचनं कृतम्।

तृतीयप्रपाठके संहितायाः लक्षणं, स्वरसन्धिः एवं विसर्जनीयस्य विकारस्य विवरणं कृतम्।

चतुर्थप्रपाठके सन्धेः फलस्वरूपविसर्जनीयस्य स्थाने भवितव्यानां विकाराणां विवेचनं, तथा लोप, आगम एवं दीर्घभावानां विवेचनं कृतम्।

पञ्चमप्रपाठके दीर्घः कुत्र, कदा भवति एतदधिकृत्य विविच्य तदन्ते मूर्धन्यभावस्य विवेचनं कृतम्।

अस्य ऋक्तन्त्रव्याकरणमित्यपि व्यवहारो विद्यते, मूलग्रन्थेषु। पाणिनिव्याकरणसूत्रात् लघुभूतानि सूत्राणि विद्यन्तेऽत्र। यथा "लृतुलसानां दन्ताः", एतत्सूत्रस्थाने, "दन्ते त्स्लाः" इति, "इचुयशानां तालु" इति स्थाने, "तालु निश्च्ये" इति एवमादीनि सूत्राणि नैकविधानि सन्ति । इदम् "अथ वाचो वृत्तिं व्याख्यास्यामः" इत्यारभ्य "षाद्दन्त्यः" इति समाप्यते।

1.5.ऋक्तन्त्रस्य कर्तृविचारः-

भारतीयमनीषिणः सदासर्वदा स्वात्मकथनात् विरताः। अतः प्राचीनाचार्याणां रचनायाः उल्लेखनस्य अभावः दृश्यते। ऋक्तन्त्रस्य प्रणेतारमवलम्ब्य एषैव समस्या वरीवर्ति। शाकटायनः तथा औदव्रजीति कर्तृविषये द्वयोर्नामनी भवतः।

1.5.1.शाकटायनः-

ऋक्तन्त्रस्य कर्ता शाकटायनः। ग्रन्थान्ते लिख्यते शाकटायनोक्तमृक्तन्त्रव्याकरणं सम्पूर्णम्। सामवेदसर्वानुक्रमणिकायामपि ऋक्तन्त्रस्य कर्ता शाकटायन इति स्मृतम्-

"ऋचां तन्त्र व्याकरणे पञ्चसंख्या प्रपाठकाः।

शाकटायनदेवेन द्वात्रिंशत्खण्डिका स्मृताः।।"[13]

निरुक्त, प्रातिशाख्यग्रन्थानामध्ययनात् ज्ञायते यत् वैयाकरणसम्प्रदाये शाकटायनस्य स्थानमत्यन्तं महत्वपूर्णम्। अस्य सिद्धान्तः सर्वत्र समादृतः आसीत्। नागेशभट्टेन लघुशब्देन्दुशेखरे ऋक्तन्त्रं व्याकरणग्रन्थरूपेण स्वीकृत्य अस्य कर्ता शाकटायन इत्युक्तम्। ऋक्तन्त्रव्याकरणे शाकटायनोऽपि "इदमक्षरच्छन्दोवर्णशः समनुक्रान्तं यथाऽऽचार्या ऊचुर्ब्रह्मा...न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिः इति ब्रह्मराशि"[14]रित्यस्य ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः ।। नागेशोऽप्येवमेवाह। "नाद इति शाकटायनः " इत्यादि वर्तते।

1.5.2.औदव्रजिः-

प्रप्रथमतया वंशब्राह्मणे औदव्रजेः उल्लेखः दृश्यते ..पुष्यशा औदव्रजिः पुष्यशा- औदव्रजिः इति। नारदीयशिक्षायां वर्णोच्चारणसन्दर्भे उल्लेखितं- तेनास्य करणं सौक्ष्म्यं माधुर्यं चोपजायते। वर्णांश्च कुरुते सम्यक् प्राचीनौदव्रजिर्यथा[15]। पाणिनीयशिक्षायाः पञ्जिकाभाष्ये प्राप्यते - तथा चौदव्रजिः तत्र स्पृष्टं प्रयत्नं करणं स्पर्शानाम्, दुःस्पृष्टमन्तस्थानाम् इति। भट्टोजिदीक्षितस्तु पाणिनीयशिक्षा-व्याख्यायां शब्दकौस्तुभे ऋक्तन्त्रव्याकरणाख्य छान्दोग्यलक्षणस्य प्रणेता औदव्रजिरप्यसूत्रयत् । [16]"अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः" इत्यौदव्रजिः । अपि च ऋक्तन्त्रे न्यायेनौदव्रजिः। अनेन ऋक्तन्त्रस्य कर्ता औदव्रजिः इति प्रसिद्ध्यति।

अतः ऋक्तन्त्रस्य अनयोः कतरः कर्तेति निर्धारयितुं न शक्यते इति स्थितौ लघुऋक्तन्त्रसंग्रहस्य संस्करणे डा. सूर्यकान्तेन ऋक्तन्त्रस्य कर्ता शाकटायन इति स्पष्टीकृतम्। कर्तृविषयक द्वैधतायां परवर्ती विदुषा समाधानार्थं प्रयत्नं कृतम्। संस्कृतव्याकरणशास्त्रस्य इतिहासकारः प्रसिद्धः वैदिकः, वैयाकरणिश्च युधिष्ठिरमीमांसकः, तथा ''वैदिकसाहित्य और संस्कृति'' ग्रन्थस्य कर्ता प्रसिद्धः वैदिक इतिहासज्ञः बलदेव उपाध्यायेन ''कर्ता औदव्रजिरिति व्यक्तिगतं नाम तथा शाकटायन इति तस्य गोत्रनाम आसीदि''ति प्रतिपादितम्। अत्र एकस्यैव व्यक्तेः गोत्रजं तथा वैयक्तिकं नाम इति जानीयात्।

1.6.ऋक्तन्त्रस्थ आचार्याणां विवरणम्

1.6.1. इन्द्रः- प्राचीन व्याकरणाचार्येषु इन्द्रस्य अत्यन्तं महत्वपूर्णं स्थानं विद्यते। इन्द्रः सर्वप्रथमतया देवतानां प्रार्थनया अव्याकृतः संस्कृतभाषायाः व्याकृतः एवं प्रतिपदप्रकृतिप्रत्ययविभागस्य विचारं कृत्वा शब्दोपदेशस्य प्रक्रियाप्रचलनमकरोत् । उच्यते खलु तैत्तिरीयसंहितायां "वाग्वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति। ...तमिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्"[17]। "तामखण्डां वाचं मध्ये

विच्छिद्य प्रकृतिप्रत्ययविभागं सर्वत्राकरोत्"[18] सायणभाष्ये । इन्द्रेण बृहस्पतिः, अश्विनौ, मृत्युः अथवा यमः एवं कौशिकः विश्वामित्रादिषु सर्वशास्त्रं अधीतम्। जन्मना इन्द्रः ब्राह्मणः एवं कर्मणा क्षत्रियः आसीत्। उच्यते महाभारतस्य शान्तिपर्वणि "इन्द्रो वै ब्रह्मणः पुत्रः कर्मणा क्षत्रियोऽभवत्"[19] । अस्य मन्त्रिपरिषदि सहस्रऋषयः आसन् । उक्तं च कौटिल्य अर्थशास्त्रे इन्द्रस्य हि मन्त्रिपरिषद् "ऋषीणां सहस्रम्"[20] इति । इन्द्रः अध्यात्मज्ञानस्य प्राप्तये "एकसहस्रवर्षपर्यन्तं ब्रह्मचर्येण आसीत्"[21] इति छान्दोग्य उपनिषदि । स्वस्य प्रियशिष्यः भरद्वाजाय तृतीयपुरुषायुषः समाप्तिसमये वेदस्य अनन्ततायाः ज्ञानोपदेशः इन्द्रेण दत्तमिति तैत्तिरीयब्राह्मणम् [22]।

एषः ऐन्द्रव्याकरणं नामक व्याकरणग्रन्थस्य प्रणयिता। अद्य नोपलभ्यते केवल शास्त्रान्तरेण ज्ञायते। व्याकरणग्रन्थेषु अस्य सूत्राणां तथा मतानां उद्धरणं दृश्यते। येनास्य ग्रन्थस्य प्रामाण्यं सिद्ध्यति। यथा- "जराया ङसीन्द्रस्याचि"[23], "ऐन्द्रेशानादिषु व्याकरणेषु चान्झलादिरूपस्यासिद्धेः"[24], तत्रैव तृतीयपृष्ठायां

"ब्राह्मैशानमैन्द्रं च प्राजापत्यं बृहस्पतिम्।
त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्कम्।।"
"इन्द्रश्चन्द्रः काशकृत्स्नापिशलीशाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ।। "
वोपदेवः, कपिकल्पद्रुमः, प्रारम्भिक श्लोके
"ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम् ।।"[25]

ऋक्तन्त्रेपि "बृहस्पतिरिन्द्राय"[26] सूत्रेण इन्द्र नामकस्य वैदिक व्याकरणाचार्यस्य नाम अपि स्मर्यते।

1.6.2. औदव्रजिः-

आचार्यः औदव्रजेः उल्लेखः स्वराणां सन्धिप्रसङ्गे ऋक्तन्त्रेण कृतम्। यथा "न्यायेनौदव्रजिः"[27] इति । नारदीय शिक्षायां प्राचीन औदव्रजेः स्मरणं दृश्यते। यथा-

"तेनास्यकरणं सौक्ष्म्यं माधुर्यं चोपजायते।
वर्णाश्च कुरुते सम्यक् प्राचीनौदव्रजेर्यथा"।।[28]

पाणिनीयशिक्षायाः पञ्जिकाव्याख्यायामनेकेषु स्थलेषु अस्य मतानि उद्धृतानि वर्तन्ते। भट्टोजि दीक्षितेन स्वस्य शब्दकौस्तुभनामकग्रन्थे एषः ऋक्तन्त्रस्य कर्तेत्युक्तम्। [29]

1.6.3. बृहस्पतिः-

ऋक्तन्त्रानुसारेण ब्रह्मात् बृहस्पतिना अक्षरज्ञानं प्राप्तं तथा इन्द्राय तदुपदिष्टमिति। उच्यते "ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय" [30]। तथैव [31]महा-12.85.3-10, म.भा-1.1.1 । "बृहस्पतिः बुद्धेः अधिष्ठाता मन्यते"[32] । अतः बृहस्पतिं वाचस्पतिः एवं बृहतीपतिः इत्यभिधानेन च व्यवह्रियते शास्त्रेषु। बृहदारण्यकोपनिषदि उच्यते - "एष एव उ बृहस्पतिर्वाग्वै बृहती तस्या एव पतिस्तमादु बृहस्पतिः"[33]। ऐतरेयब्राह्मणे एनं देवतानां पुरोहित उच्यते। यथा – "बृहस्पतिर्वै देवानां पुरोहितः"[34]। छान्दोग्योपनिषदि बृहस्पतेः सामगानं क्रौञ्चपक्षिणः स्वरसदृशं उक्तम्। उच्यते- "विनर्दि साम्नो वृणे... क्रौञ्च बृहस्पतेरपध्वान्तं वरुणस्य"[35]। बृहस्पतिना विरचितस्यार्थशास्त्रस्यापि उल्लेखः दृश्यते। बृहस्पतिना इन्द्रकृते प्रतिपदपाठस्य

निर्धारणार्थं शब्दपारायणनामकं शास्त्रं विरचितम्। महाभारते उच्यते- "बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच"[36] । प्रक्रियाकौमुद्यां उच्यते- "दिव्यं वर्षसहस्रमिन्द्रो बृहस्पतेः सकाशात् प्रतिपदपाठेन शब्दान् पठन् नान्तं जगामेति"[37]। "शब्दपारायणशब्दो योगरूढः शास्त्रविशेषस्य" इति महाभाष्ये[38]। भर्तृहरिणा - "शब्दपारायणं रूढिशब्दोऽयं कस्यचित् ग्रन्थस्य"[39] । एनं वास्तुशास्त्रस्य उपदेशकः इत्यपि उच्यते । मत्स्यपुराणे - "तथा शुक्रबृहस्पती.....। अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः"[40] इति । बृहस्पतिस्मृतेः अभिधानात् नीतिशास्त्रेण साकं अस्य सम्बन्धः सुस्पष्टं ज्ञायते।

1.6.4. ब्रह्मा-

ऋक्तन्त्रानुसारेण व्याकरणशास्त्रस्य आदि प्रवक्ता ब्रह्मा उच्यते। अनेन अक्षरसमाम्नायस्य सर्वप्रथमं उपदेशः बृहस्पतये दत्तः। "ब्रह्मा बृहस्पतये प्रोवाच"[41] इति । परमेष्ठी एवं अथर्वा द्वावेव ब्रह्मणः सकाशात् ब्रह्मविद्यायाः ज्ञानं प्राप्तम्। प्राचीनभारतीय वाङ्मयस्य आदि प्रवक्तृरूपेण ब्रह्मणः उल्लेखः क्रियते। नाट्यशास्त्रकारेण पाठ्यं, गीतं, अभिनयं तथा रसं क्रमशः ऋग्वेदः, सामवेदः, यदुर्वेदः एवं अथर्ववेदात् संगृह्य नाटकानां रचनायाः श्रेयः ब्रह्मणे दीयते।

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ।। [42]

अयं वास्तुशास्त्र तथा दण्डनीतिविषयकः ग्रन्थानां रचयिता अपि कथ्यते।[43]

1.6.5. भरद्वाजः-

ऋक्तन्त्रानुसारेण भरद्वाजेन इन्द्रात् व्याकरण-शास्त्रमधीतम्। इन्द्रो भरद्वाजाय घोष तथा ऊष्म वर्णानामुपदेशं अदात् तथा च आयुर्वेदस्य ज्ञानं प्रायच्छत्। ऐतरेयआरण्यके उच्यते- तस्य यानि व्यञ्जनानि तच्छरीरम्, यो घोषः स आत्मा, य उष्माण स प्राण... एतदु हैवेन्द्रो भरद्वाजाय प्रोवाच[44]। चरकेन - तस्मै प्रोवाच भगवानायुर्वेदं शतक्रतुः[45] । तृणञ्जयः एवं भृगुद्वारा क्रमशः पुराणः एवं धर्मशास्त्रस्य उपदेशं प्राप्तमिति[46] वायुपुराणे। इन्द्रादुपलब्धं व्याकरणज्ञानं भरद्वाजः ऋषिभ्यः प्रायच्छत्। आत्रेयः पुनर्वसु तथा गौतमेन क्रमशः आयुर्वेदस्य तथा पुराणस्य अध्ययनं चकारि। वाजसनेयी प्रातिशाख्ये आख्यात क्रियायां भरद्वाजेन साकं विशेषः सम्बन्धः उक्तम्। अनेन ज्ञायते यत् अस्य आख्यातविषयकं मतं सर्वमान्यमासीत्।

भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते।
वासिष्ठ उपसर्गस्तु निपातः काश्यपः स्मृतः।।[47]

काशिकायां भरद्वाजस्य एकविंशति अपत्यानां निर्देशः विद्यते।[48]

1.6.6.शाकटायनः –

वैयाकरणसम्प्रदाये आचार्य शाकटायनस्य नाम अत्यन्तं सादरेण गृह्यते। "व्याकरणे शकटस्य च तोकम् वैयाकरणानां च शाकटायन आह"[49] ऋक्तन्त्रं अस्यैव कृतिरिति मन्यते। शैशिरियशिक्षानुयायी शैशिरीयपरम्परायाः आचार्यः इति मन्यते। शैशिरस्य तु शिष्यस्य शाकटायन एव[50] । वोपदेवस्य कविकल्पद्रुमे तथा वैष्णवग्रन्थे श्रीतत्वनिधेः प्रारम्भिकश्लोके प्रमुखवैयाकरणानां मध्ये शाकटायनस्य स्मरणमपि क्रियते।

"इन्द्रश्चन्द्र काशकृत्स्नापिशलीशाकटायनः।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः।। [51]
ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्।।" [52]

शाकटायनस्य सर्वविदितः सिद्धान्तः- सम्पूर्णनामशब्दाः धातुजाः एव। तत्र नामाख्यातजानीति शाकटायनो नैरुक्त समयश्च[53]। एतेषां मतानां निर्देशः प्रातिशाख्येषु, बृहद्देवतायां तथा पाणिनिना बहुशः कृतम्। ऋक्तन्त्र तथा तस्य वृत्यां ऐतिकायन, जालकाक, नकुलमुखः तथा नैगि इत्यादीनां उल्लेखः दृश्यते, परन्तु एतेषां निर्देशः अन्यत्र न लभ्यते। अतः एतेषां विषये विशेषरूपेण किमपि न ज्ञायते।

1.7. ऋक्तन्त्रग्रन्थस्य संस्करणानि

अद्यावधिपर्यन्तं ऋक्ततन्त्रस्य संस्करणत्रयं प्रकाशितम्। येषां सम्पादनस्य श्रेयः डा.ए.सी.वर्नेल, डा. मेतल्लाहुरु सूर्यकान्त तथा मायुरं म.रामनाथदीक्षितवर्याणामेव।

1.7.1. ऋक्तन्त्रस्य प्रथमसंस्करणम्

ऋक्ततन्त्रस्य प्रथमसंस्करणं डा. ए. सी. बर्नेल महोदयेन सन् 1879मध्ये मङ्गलोर, कर्णाटकतः प्रकाशितम्। अस्य संस्करणस्य प्रति गोयनका पुस्तकालय, वाराणस्यां विद्यते। अन्यत्र जीर्णशीर्णावस्थायां लभ्यते।

1.7.2. . ऋक्तन्त्रस्य अपरं संस्करणम्

विद्याभास्कर, वेदान्तरत्न, व्याकरणतीर्थादि विरुदावल्या अभिषिक्तेन डा. मेतल्लाहुरु सूर्यकान्त महोदयेन दिसम्बर 1933 तमे वर्षे लाहौरतः पञ्जाबविश्वविद्यालयस्य रौप्यजयन्त्यवसरे प्रकाशितम्। 1970तमे वर्षे एतदेव पुस्तकं मेहरचन्दलक्षणदासेन, नईदिल्लीतः प्राकाश्यं नीतम्। एतदपि इदानीं नोपलभ्यते।

1.7.3. ऋक्तन्त्रस्य अन्यत्संस्करणम्

धर्मज्ञः, विद्यावाचस्पतिः ब्रह्मश्री मायुरम् म. रामनाथदीक्षितवर्येण 1982 तमे वर्षे श्रुतिस्मृतिपुराणप्रकाशनसमित्या प्रकाशितः सामवेदीयः उत्तरार्चिकः पदपाठपुस्तकस्यान्ते सविवरणं ऋक्तन्त्रं सम्पाद्य प्रकाशितम्। पुस्तकमिदं नोपलभ्यते।

1.8. उपसंहारः

अद्यावधि यद्यपि संस्करणत्रयं जातं तथापि तेषां ग्रन्थानामुपलब्धिः न दृश्यते। डा सूर्यकान्तमहोदयेन प्रकाशितं संस्करणं यद्यपि विषयबाहुल्यं दृश्यते परन्तु तत्र विषयाणां प्रतिपादनं आंग्लमाध्यमेन कृतत्वात् स्पष्टतया नावगम्यते। अन्यदपि तत्र द्वितीयप्रपाठकादेव सूत्राणां वृत्तिः उदाहरणं च प्रदत्तमस्ति। रामनाथदीक्षितकृतविवरणं प्रथमप्रपाठकात् लभ्यते इति कारणात् तदपि अत्र आन्तं सूत्रे संयोजितम्। इतोपि सूत्राणामर्थं स्पष्टरूपेणावबोधाय हिन्दीभाषया अर्थमपि प्रदत्तम्। केचनसूत्राणां पृथक् रूपेणार्थकल्पनं ऋक्तन्त्रविवृत्या कृतं वर्तते एतदपि आवश्यकम्मत्वा स्थापितम्। पारम्पर्यानुसारेण छात्राणामध्ययनसौकर्याय आदौ तावत् ऋक्तन्त्रस्य मूलपाठः, अन्ते तावत् परिशिष्टत्वेन ऋक्तन्त्रस्थ अकारादिसूत्रानुक्रमणिका, पारिभाषिकशब्दावली, सूत्रस्थ शब्दानुक्रमणिकादि दत्वा पुस्तके यथा एतत्सम्बन्धि सर्वाः विषयाः संगृहीताः भवेयुः तथा कृता वर्तते। भूमिकायां प्रातिशाख्यानां प्रतिपाद्यांशाः, ऋक्तन्त्रस्य परिचयः, कर्तृविचारः, संस्करणानि प्रतिपादितानि।

सन्दर्भाः-

1. ऋ.प्रा.वि.व.5,6
2. तै.प्रा. 1.1, 24.4, 24.6,
3. ऋ.प्रा.वि.व .8
4. नि.1.17
5. म.भा.1.2.32
6. वा.प्रा. 1.26
7. पाणिनीयसूत्र 4.3.59

8. ऋक्प्रातिशाख्यस्य उव्वटभाष्ये मङ्गलाचरणम्
9. तत्वबोधिनी- 5.1.3
10. तैत्तिरीयप्रातिशाख्ये - 4.11
11. सामवेदसर्वानुक्रमणि.स.ल.1, 2,3
12. सामवेदसर्वानुक्रमणि.30,31, 32,33
13. सामवेदसर्वानुक्रमणि.30
14. ऋक्तन्त्रम् .1.4
15. नारदीयशिक्षा 2.8.5
16. ऋक्तन्त्रम्.1.2
17. तै.सं-6.4.7
18. तै.सं-6.4.7 सायणभाष्ये
19. म.भा, शान्तिपर्व-21.11
20. कौटिल्य अर्थशास्त्रम् 2.15
21. छान्दोग्य उपनिषदि 8.7.11
22. तैत्तिरीयब्राह्मणम्-3.10.11
23. शाकटायन व्याकरणं - 1.2.27
24. हैमबृहद्वृत्यवचूर्णि पृ.10
25. श्रीतत्वनिधिः, पृ-50
26. ऋ.तं -1.4
27. ऋ.तं-2.6.10
28. ना.शि.2.8.5
29. शब्दकौस्तुभः पृ.143
30. ऋ.तं.1.4
31. महा-12.85.3-10, म.भा-1.1.1
32. मै.सं-2.6), श.ब्रा-14.4.1.1
33. बृ.उ. 1.3.20
34. ऐ,ब्रा,8.26
35. छा.उ,2.22.1
36. म.भा,1.1.1
37. प्रक्रियाकौमुदी- भागः-1, पृ.7
38. महाभाष्ये 1.1.1 कैयटः
39. महाभाष्य दीपिका पृ,21
40. मत्स्यपुराणम्-251.3-4
41. ऋ.तं,1.2
42. ना.शास्त्र.1
43. मत्स्यपुराणे-252.2
44. ऐ.आ,2.2.4
45. चरकसंहिता-1.23
46. वायुपुराणे 1.3.63
47. वा.प्रा,8.65
48. पा.सू,2.1.19 काशिका
49. म.भा-3.3.1
50. च-शै.शि प्रारम्भिकश्लोकः
51. कविकल्पद्रुमः प्रारम्भिकश्लोकः
52. श्रीतत्वनिधिः प्रारम्भिकश्लोकः
53. नि.1.13

Asst Professor
Sri Venkateswara Vedic University
Tirupati
gpshadangi@gmail.com
Mo-9951051209